# ॥ श्री राम पूजा ॥

ईश्वर सम्वत् चैत्र शुद्ध नवमी

1 At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

---

At Shrii Raama Altar
२ आचमनः

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा । ॐ गोविंदाय नमः ।
ॐ विष्णवे नमः । ॐ मधुसूदनाय नमः ।
ॐ त्रिविक्रमाय नमः । ॐ वामनाय नमः ।
ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः ।
ॐ पद्मनाभाय नमः । ॐ दामोदराय नमः ।
ॐ संकर्षणाय नमः । ॐ वासुदेवाय नमः ।
ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः ।
ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः ।
ॐ नारसिंहाय नमः । ॐ अच्युताय नमः ।
ॐ जनार्दनाय नमः । ॐ उपेंद्राय नमः ।
ॐ हरये नमः ।
श्री कृष्णाय नमः ॥

---

३ प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यं ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो यो नः प्रचोदयात् ॥
(Repeat aachamana )
ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

---

४ संकल्पः

ॐ श्रीमान् महागणाधिपतये नमः ।
श्री गुरुभ्यो नमः । श्री सरस्वत्यै नमः ।
श्री वेदाय नमः । श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः ।
स्थानदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः ।
वास्तुदेवताभ्यो नमः । शचीपुरंदराभ्यां नमः ।
उमामहेश्वराभ्यां नमः । मातापितृभ्यां नमः ।
लक्ष्मीनारायणाभ्यां नमः ।

सर्वेभ्यो देवेभ्यो नमो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
येतद्कर्मप्रधान देवताभ्यो नमो नमः ॥

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटेश्चैव विघ्नः तस्य न जायते ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमंगलं ।
येषां हृदिस्थो भगवान् मंगलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव लक्ष्मीपतेः तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दिवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे

दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे तीरे परशुराम क्षेत्रे (सम्युक्त अमेरिका देशे St Lewis ग्रामे or Australia देशे Victoria ग्रामे बह्रीनु देशे) शालिवाहन शके वर्तमाने व्यवहारिके ईश्वर नाम संवत्सरे उत्तरायणे वसन्त ऋतौ, चैत्र मासे, शुक्ल पक्षे, नवम्याम् तिथौ, पुनर्वसु नक्षत्रे, बुधः वासरे, सर्व ग्रहेषु यथा राशि स्थान स्थितेषु सत्सु येवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मन श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं मम सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ सिध्यर्थं अंगीकृत श्री रामनवमी व्रतांगत्वेन संपादित सामग्रय्या श्री रामचंद्र प्रीत्यर्थं यथा शक्त्या यथा मिलितोपचार द्रव्यैः पुरुषसूक्त, श्री सूक्त पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारे श्री रामचन्द्र पूजां करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनिजन्मनि॥
(keep fruits in front of the Lord)

---

५ षडङ्ग न्यास
(touching various parts of the body)

ॐ रामाय नमः । अन्गुष्ठाभ्यायां नमः ।
(touch the thumbs)
हृदयाय नमः ॥
ॐ राम भद्राय नमः । तर्जनीभ्यां नमः ।
(touch both fore fingers)
शिरसे स्वाहा ॥
ॐ राम चन्द्राय नमः । मध्यमाभ्यां नमः ।
(touch middle fingers)
शिखायेय् वौषट् ॥
ॐ राघवाय नमः । अनामिकाभ्यां नमः ।
(touch ring fingers)
कवचाय हुम् ॥
ॐ रघु पुंगवाय नमः । कनिष्ठिकाभ्यां नमः ।
(touch little fingers)
नेत्रत्रयाय वौषट् ॥
ॐ जानकी वल्लभाय नमः । करतलकरपृष्ठाभ्यां नमः ।
अस्त्राय फट् ॥
(snap fingers, circle head clockwise and clap hands)

---

६ दिग्बन्धन
( show mudras)

ॐ राम भद्रे इति दिग्बन्धः । दिशो बद्नामि ॥

---

७ गणपति पूजा

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
ॐ गणानां त्वा शौनको घृत्समदो गणपतिर्जगति
गणपत्यावाहने विनियोगः ॥
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे ।
कविं कविनामुपम श्रवस्तमं ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत ।
आनः शृण्वन्नूतिभिः सीदसादनं ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।
स्वः गणपतिं आवाहयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महा गणपतये नमः । आवाहनं समर्पयामि ।
ॐ महा गणपतये नमः । आसनं समर्पयामि ।
ॐ महा गणपतये नमः । पाद्यं समर्पयामि ।
ॐ महा गणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महा गणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महा गणपतये नमः । स्नानं समर्पयामि ।
ॐ महा गणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महा गणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महा गणपतये नमः । चंदनं समर्पयामि ।
ॐ महा गणपतये नमः । परिमल द्रव्यं समर्पयामि ।
ॐ महा गणपतये नमः । पुष्पाणि समर्पयामि ।
ॐ महा गणपतये नमः । धूपं समर्पयामि ।
ॐ महा गणपतये नमः । दीपं समर्पयामि ।
ॐ महा गणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महा गणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महा गणपतये नमः । फलं समर्पयामि ।
ॐ महा गणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महा गणपतये नमः । आर्थिक्यं समर्पयामि ।

ॐ भूर्भुवस्वः महा गणपतये नमः ।
मन्त्रपुष्पं समर्पयामि ।
ॐ भूर्भुवस्वः महा गणपतये नमः ।
प्रदक्षिणा नमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महा गणपतये नमः ।
छत्रं समर्पयामि ।

ॐ महा गणपतये नमः । चामरं समर्पयामि ।
ॐ महा गणपतये नमः । गीतं समर्पयामि ।
ॐ महा गणपतये नमः । नृत्यं समर्पयामि ।

ॐ महा गणपतये नमः । वाद्यं समर्पयामि ।
ॐ महा गणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥
ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महा गणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महा गणपति प्रीयताम् ॥

---

८ दीप स्थापना

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।
अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
(light the lamps)

---

९ भूमि प्रार्थना

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां
पिप्रतान्नो भरीमभिः ॥

---

१० धान्य राशि

ॐ औषधय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
(Touch the grains/rice/wheat)

---

११ कलश स्थापना

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्तैर्यज्ञेषु वर्धते ॥
(keep kalasha on top of rice pile)
ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
(fill kalasha with water)
ॐ गंधद्वारां धुरादर्शां नित्य पुष्पं करिषिणीं ।
ईश्वरिं सर्व भूतानां तामि ह्योपह्वयेश्रियं ॥
(sprinkle in/apply ga.ndha to kalasha)
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मंचत्वं हसः ॥
(put beetle nut in kalasha)
ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः ।
तम्भागं चित्रमीमहे ॥
(put jewels / washed coin in kalasha)
ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात्परियोनेर्निषद्या हिरण्यदाददत्थ्यन्नमस्मै ॥
(put gold / daxina in kalasha)
ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
(put duurva / karika )
ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषं ॥
(put five leaves in kalasha)
ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
(tie cloth for kalasha)
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
(copper plate and ashhTadala with ku.nkuM)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

११ वरुण पूजन
On the second kalasha)

तत्वायामि शुनः शेपोः वरुण त्रिष्टुप् कलशे
वरुणावाह्ने विनियोगः ॥

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
आहेलमानो वरुणः बोध्युरुशं समान आयुः प्रमोषिः ॥

ॐ भूर्भुवःस्वः वरुणाय नमः ।
चंदनं समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
अक्षतान् समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
हरिद्रा कुंकुमं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
धूपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
दीपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
नैवेद्यं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
सकल राजोपचारार्थे अक्षतान् समर्पयामि ॥

अवते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयं नमस्मभ्यं सुरप्रचेता राजन्नेनाम्सि शिश्रथः कृतानि ॥
वरुणाय नमः । मन्त्र पुष्पं समर्पयामि ॥

प्रदक्षिणा नमस्कारान् समर्पयामि ॥

अनया पूजया भगवान् श्री महा वरुण प्रीयताम् ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१२ कलश पूजन
(continue with second kalasha)

कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलं ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥
सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥
(Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा ।
अमृति करणार्थे धेनु मुद्रा ।
पवित्री करणार्थे शंख मुद्रा ।
संरक्षणार्थे चक्र मुद्रा ।
विपुलमाया करणार्थे मेरु मुद्रा ।

---

१३ शंख पूजन
(pour water from kalasha to sha.nkha
add ga.ndha flower)

शंखं चंद्रार्क दैवतं मध्ये वरुण देवतां ।
पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीं ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व देवैश्च पाञ्चजन्यं नमोऽस्तुते ॥

पाञ्चजन्याय विद्महे ।पावमानाय धीमहि ।
तन्नो शंखः प्रचोदयात् ॥

शंख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि॥

---

१४ घंटार्चना
(Pour drops of water from sha.nkha on top of the bell
apply ga.ndha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसां ।
कुरु घंटारवं तत्र देवतावाहन लांछनं ॥
ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।
राक्षसानां पिशाचनां तद्देशे वसतिर्भवेत् ।
तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ।

घंट देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTaa)

---

१५ आत्मशुद्धि
( Sprinkle water from sha.nkha
on puujaa items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

---

१७ षट् पात्र पूजा
( put tulasi leaves or axataas in empty vessels)

वायव्ये अर्घ्यं ।
नैऋत्ये पाद्यं ।
ईशान्ये आचमनीयं ।
आग्नेये मधुपर्कं ।
पूर्वे स्नानियं ।
पश्चिमे पुनराचमनं ।

---

१८ पञ्चामृत पूजा
( put tulasi leaves or axataas in vessels )

क्षीरे सोमाय नमः । (keep milk in the centre)
दधिनि वायवे नमः । (curd facing east )
घृते रवये नमः । (Ghee to the south)

मधुनि सवित्रे नमः । ( Honey to west )
शर्करायां विश्वेभ्यो देवेभ्यो नमः । ( Sugar to north)

---

१९ द्वारपालक पूजा

पूर्वद्वारे द्वारश्रियै नमः ।
जयाय नमः । विजयाय नमः ।
दक्षिणद्वारे द्वारश्रियै नमः ।
नंदाय नमः । सुनंदाय नमः ॥
पश्चिमद्वारे द्वारश्रियै नमः ।
बलाय नमः । प्रबलाय नमः ॥
उत्तरद्वारे द्वारश्रियै नमः ।
कुमुदाय नमः । कुमुदाक्षाय नमः ॥

मध्ये नव रत्नखचित दिव्य सिंहासनस्योपरि
श्री सत्यनारायण स्वामिने नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

पीठस्य अधोभागे आधार शक्त्यै नमः ॥ कूर्माय नमः ॥
दक्षिणे क्षीरोदधिये नमः । सिंहाय नमः ॥
सिंहासनस्य आग्नेय कोणे वराहाय नमः ॥
नैऋत्य कोणे ज्ञानाय नमः ॥
वायव्य कोणे वैराग्याय नमः ॥
ईशान्य कोणे ऐश्वर्याय नमः ॥
पूर्व दिशे धर्माय नमः ॥
दक्षिण दिशे ज्ञानाय नमः ॥
पश्चिम दिशे वैराग्याय नमः ॥
उत्तर दिशे अनैश्वराय नमः ॥
पीठ मद्धये मूलाय नमः ॥
नालाय नमः ॥
पत्रेभ्यो नमः ॥
केसरेभ्यो नमः ॥
कर्णिकायै नमः ॥
कर्णिका मध्ये सं सत्त्वाय नमः ॥
रं रजसे नमः ॥ तं तमसे नमः ॥

सूर्यमण्डलाय नमः ॥
सूर्यमण्डलाधिपतये ब्रह्मणे नमः ॥
सोममण्डलाय नमः ॥
सोममण्डलाधिपतये विष्णवे नमः ॥
वह्निमण्डलाय नमः ॥
वह्निमण्डलाधिपतये ईश्वराय नमः ॥

श्री सत्यनारायणाय नमः । पीठ पूजां समर्पयामि ॥

---

२१ दिग्पालक पूजा
(Start from east of kalasha or deity)

इंद्राय नमः ॥
अग्नये नमः ॥
यमाय नमः ॥
नैऋतये नमः ॥
वरुणाय नमः ॥
वायव्ये नमः ॥
कुबेराय नमः ॥
ईशानाय नमः ॥

इति दिग्पालक पूजां समर्पयामि ॥

---

२२ प्राण प्रतिष्ठ
(hold flowers/axata in hand)

ध्यायेत् सत्यम् गुणातीतं गुणत्रय समन्वितं
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।
नीलवर्णं पीतवासं श्रीवत्स पदभूषितं
गोकुलानन्दं ब्रह्माध्यैरपि पूजितम् ॥

(hold flowers/axataa in hand)
ॐ अस्य श्री रामचन्द्र प्राण प्रतिष्ठापन महा
मंत्रस्य, ब्रह्मा, विष्णु, महेश्वरा ऋषयः,
ऋग्यजुर्सामाथर्वाणि छन्दांसि, प्राण शक्तिः, परा
देवता, ह्रां बीजं, ह्रीं शक्तिः, क्रों कीलकं,
मम श्री रामचन्द्र प्राण प्रतिष्ठ सिद्धयर्थे
जपे विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रौं मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रौं करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाहा ॥
क्रौं शिखायै वौषट् ॥
आं कवचाय हुं ॥

ह्रीं नेत्रत्रयायवौषट् ॥
क्रौं अस्त्राय फट् ॥

भूर्भुवस्वरों ॥

आं ह्रीं क्रौं क्रौं ह्रीं आं
य र ल व श ष स ह्
ॐ अहं सः सोहं सोहं अहं सः ।

अस्यां मूर्ते प्राणः तिष्ठंतुः
अस्यां मूर्ते जीवः तिष्ठन्तु
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत् चक्षुः
श्रोत जिह्वा गृह्ण वाक्वाणि पादपायोपस्थनि
प्राण अपान व्यान उदान समान अत्रागत्य
सुखं स्थिरं तिष्ठन्तु स्वाहा।

असुनीते पुनरस्मासु चक्षुवः पुनर्प्राणमिहीनो
देहिभोगं जोक्षक्षेम सूर्यमुच्चरन्तं मनुमते
मृडयान स्वस्ति अमृतं वै प्राणः अमृतमापः प्राणानेव
यथा स्थानं उपह्णयेत् ॥

स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकं
तावत्व प्रीतिभावेन बिम्बेस्मिन् कलशेस्मिन्
प्रतिमायां सन्निधिं कुरु ॥

ध्यानं

रक्ताम्भोधिस्थ पोतोल्लसदरुण सरोजाधिरूढा कराब्जैः
पाशं कोदण्ड मिक्षुद्भवमळिगुण मप्यंकुशं पंचबाणान् ।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

लं पृथ्व्यात्मिकायै गन्धं समर्पयामि ।
हं आकाशात्मिकायै पुष्पैः पूजयामि ।
यं वाय्वात्मिकायै धूपमाघ्रापयामि ।
रं अग्न्यात्मिकायै दीपं दर्शयामि ।
वं अमृतात्मिकायै अमृत महानैवेद्यं निवेदयामि ।
सं सर्वात्मिकायै सर्वोपचारपूजां समर्पयामि ॥

आं, ह्रीं, क्रों, क्रोम्, ह्रीं, आं ।
य, र, ल, व, श, ष, स, ह, हों, हंसस्सोहं सोऽहं हंसः ॥

ॐ
श्री रघुवर प्राणः, मम प्राणः श्री रघुवर
जीवः, मम जीवः, वांग्मनः श्रोत्र, जिह्वाग्राणैः
उच्चा स्वरूपेन बहिरागत्य अस्मिन् बिंबे अस्मिन् कलशे,
अस्यां प्रतिमायां सुखेन चिरं तिष्टन्तु स्वाहा

असुनीते पुनरस्मासु चक्षुवः, पुनर्प्राणमिहीनो
देहिभोगं, जोक्षक्षेम सूर्यमुच्चरन्तं मनुमते,
मृडयान, स्वस्ति अमृतं वै प्राणः अमृतमापः,
प्राणानेव यथा स्थानं उपह्णयेत्

स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकं
तावत्व प्रीतिभावेन बिम्बेस्मिन्, कलशेस्मिन्, प्रतिमायां,
सन्निधिं कुरु

आवाहितो भव, स्थापितो भव, सन्निहितो भव, सन्निरुद्धो
भव, अवकुंठिथो भव, सुप्रीतो भव, सुप्रसन्ना भव,
सुमुखो भव, वरदा भव,
मम सर्वाभीष्ट फलप्रदो भव,
प्रसीद प्रसीद ॥
(show mudras to Lord)

आश्वावहन्तु हरयुश्वचेतश्वेत्रैरश्वैशकेतुमद्भिः
वाताजवैर्बलवर्बिर्मनोजवैरायाहि शीघ्रं मम
हव्यायश्वर्वोम्
(offer the flowers, axatas and prayers)

---

२३ ध्यानं

ॐ ॐ (repeat 15 times)
कोमलाङ्गं विशालाक्षं इन्द्रनील समप्रभम्
दक्षिणाङ्गे दशरतं पुत्राप्येक्षेण तत्परम्
प्रष्टतो लक्षणं देवं सछत्रं कनक प्रभम्
पार्श्वे भरत शत्रुघ्न,चामर व्जनान्वितौ
अग्रेत्यग्रौ हनूमन्तं रामानुग्र कान्क्षिणम्

(you can add more related shlokas)

---

२४ आवाहनं
( hold flowers in hand)

आऊं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

विश्वेशं जानकी वल्लभ प्रभु
कौसल्या तनयं विष्णुं श्री रामं प्रकृतेः परं

आगच्छ देव देवेश, तेजोराशे जगत्पते,
क्रिय माणाम् मया पूजां, गृह्ण सुरसत्तमे

श्री रामागच्छ भगवन् रघुवीर नृपोत्तम
जानक्य सह राजेन्द्र सुस्तिरो भव सर्वदा

रामचन्द्र महेश्वास रावणान्तक राघव
यावत् पूजं समासेहं तावत्वां सन्निदा भव

रघुनायक राजर्शे नमो राजीवलोचन
रघुनन्दन मे देव, श्री रामाभिमुखो भव

श्री सीता सहित, श्री रामचन्द्राय, सान्गाय, सपरिवाराय, सायुधाय, सशक्तिकाय नमः। श्री सीता सहित, श्री रामचन्द्रं, सान्गं, सपरिवारं, सायुधं, स शक्तिकं, आवाहयामि

(offer flowers to Lord)

आवाहितो भव । स्थापितो भव । सन्निहितो भव ।
सन्निरुद्धो भव । अवकुंठिथो भव । सुप्रीतो भव ।
सुप्रसन्नो भव । सुमुखो भव । वरदा भव ।
प्रसीद प्रसीद ॥
(show mudras to Lord)

---

२५ आसनं

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

राजाधिराज राजेन्द्र रामचन्द्र महीपते
रत्न सिम्हासनं तुभ्यं दास्यामि स्वीकरु प्रभो

ॐ श्री रामचन्द्राय नमः,
आसनं समर्पयामि ॥

(offer flowers/axathaas)

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

---

२६ पाद्यं
(offer water)

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

त्रैलोक्य पावनानन्त नमस्ते रघुनायक
पाद्यं गृह्ण राजर्शे नमो राजीव लोचन

ॐ श्री रामचन्द्राय नमः, पादोयो पाद्यं समर्पयामि ।

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥

पादोयो पाद्यं समर्पयामि ॥

---

२७ अर्घ्यं
(offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

परिपूर्ण परानन्द नमो रामाय वेधसे
गृहाणार्घ्यम् मया दत्तम् कृष्ण विष्णो जनार्दन

ॐ श्री रामचन्द्राय नमः, अर्घ्यम् समर्पयामि

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥

अर्घ्यं समर्पयामि ॥

---

२८ आचमनीयं
(offer water or axathaa/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥

नमः सत्याय शुद्धाय नित्याय ज्ञान रूपिणे
गृहाणाचमनं राम सर्व लोकैक नायक

ॐ श्री रामचन्द्राय नमः, आचमनीयं समर्पयामि

चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

आचमनीयं समर्पयामि ॥

---

२९ मधुपर्कं

नमः श्री वासुदेवाय तत्वज्ञान स्वरूपिणे ।
मधुपर्कं गृहाणेदं जानकीपतये नमः ॥

ॐ श्री रामचन्द्राय नमः । मधुपर्कं समर्पयामि ॥

---

२७ स्नानं

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

ब्रह्माण्डोदर मध्यस्तैस्तितैस्च रघुनन्दन
स्नापयिश्याम्यहं भक्त्या त्वं गृह्ण जनार्दना

ॐ श्री रामचन्द्राय नमः, मलापकर्श स्नानं समर्पयामि

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥

---

२७ अ. पञ्चामृत स्नानं
२७ अ. १ पय स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य सन्गाधे ॥

सुरभेस्तु समुत्पन्नं, देवानां अपि दुर्लभम्
पयो दधामि देवेश, स्नानार्थम् प्रतिगृह्यताम्

ॐ श्री रामचन्द्राय नमः, पयह् स्नानम् समर्पयामि।
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ अ. २ दधि स्नानं (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्राण आयुंषितारिषत् ॥

चन्द्र मन्डल सम्काशं, सर्व देव प्रियं हि यत्,
दधि ददामि देवेश, स्नानार्थम् प्रतिगृह्यताम्

ॐ श्री रामचन्द्राय नमः, दधि स्नानं समर्पयामि।
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि

२७ अ. ३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह् मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यं ॥

आज्यं सुरानां आहारं आज्यं यज्ञेय प्रतिष्ठितम्
आज्यं पवित्रं परमं स्नानार्थां प्रतिगृह्यता

ॐ श्री रामचन्द्राय नमः, घृत स्नानं समर्पयामि।
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ अ. ४ मधु स्नानं (honey bath)

ॐ मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः
संतोष्वधीः
मधुनक्त मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पित
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषधि समुत्पन्नं पीयुष सदृशं मधु,
स्नानर्तन्ते मया दत्तं गृह्ण परमेश्वर

ॐ श्री रामचन्द्राय नमः, मधु स्नानं समर्पयामि।
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ अ. ५ शर्करा स्नानं (sugar bath)

ॐ स्वाधुः पवस्य दिव्याय जन्मने स्वाधुदरिन्द्राय सुहवीतु नाम्ने
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्ना, रस्यस्निग्ध तरा शुभा
शर्करेयम् मया दत्ता, स्नानार्थम् प्रतिगृह्यताम्

ॐ श्री रामचन्द्राय नमः, शर्करा स्नानं समर्पयामि।
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ ब. १ गंधोदक स्नानं (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीं ।
ईश्वरीं सर्व भूतानां तामि होप व्हयेश्रियं ॥

हरि चंदन संभूतं हरि प्रीतेश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यतां ॥

ॐ श्री रामचन्द्राय नमः ।गंधोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ च. १ अभ्यंग स्नानं (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान।इयर्थिर्वाचमरितेव नावं ।
सुमंगलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवं ।
सुगंध द्रव्य संमिश्रं संगृह्याण जगत्पते ॥

ॐ श्री रामचन्द्राय नमः, अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ द. अंगोद्वर्तनकं (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितं ।
लेपनार्थं गृहाणेदं हरिद्रा कुंकुमैर्युतं ॥

ॐ श्री रामचन्द्राय नमः, अंगोद्वर्तनं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ ए. उष्णोदक स्नानं (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतं ।
स्नानार्थं च प्रयश्चमे स्वीकुरुश्व दयानिधे ॥

ॐ श्री रामचन्द्राय नमः। उष्णोदक स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२७ फ़. शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around

ॐ आपोहिष्टा मयो भुवः । तान ऊर्जे दधातन ।
महेरणाय चक्षसे । योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः । तस्मा अरंगमामवो । यस्य क्षयाय जिंवथ ।
आपो जन यथाचनः ॥

ॐ श्री रामचन्द्राय नमः। शुद्धोदक स्नानं समर्पयामि ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(after sprinkling water around , throw one tulasi leaf to the north)

---

२८ महा अभिषेकः
( Sound the bell , pour water from kalasha)

२८ अ. पुरुष सूक्त

॥ अथ पुरुषसूक्तम् ॥

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥ १॥
पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥ २॥
एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥ ४॥
तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥ ५॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥ ६॥
सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७॥
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूगँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥ ८॥
तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥ ९॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥ ११॥
ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२॥
चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३॥
नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥ १४॥
वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः
नामानि कृत्वाऽभिवदन् यदास्ते ॥ १५॥
धाता पुरस्ताद्यमुदाजहार
शक्रः प्रविद्वान्प्रदिशश्चतस्त्रः ।
तमेवं विद्वानमृत इह भवति
नान्यः पन्था अयनाय विद्यते ॥ १६॥
यज्ञेन यज्ञमयजन्त देवाः
तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते
यत्र पूर्वे साध्याः सन्ति देवाः ॥ १७॥

ॐ श्री रामचन्द्राय नमः । पुरुषसूक्त स्नानं समर्पयामि। ॥

---

२८ ब. श्री सूक्त

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥
कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ७ ॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥ ८ ॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ९ ॥
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥
कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥
आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥
आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥
पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥ १७ ॥
अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवी सर्वकामांश्च देहि मे ॥ १८ ॥
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥ १९ ॥
पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ २० ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥ २१ ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ २३ ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ २४ ॥
सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ २५ ॥
विष्णुपत्नीं क्षमादेवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २६ ॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥ २७ ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २८ ॥

ॐ श्री रामचन्द्राय नमः । श्री सूक्त स्नानं समर्पयामि ॥

---

२८ च. विष्णु सूक्त

अतो देवा अवन्तुनो यतो विष्णुर्विचक्र मे
प्रत्विव्या सप्तधामभिः, इदम् विष्णुर्विचक्रमे
त्रेधा निदधे पदं, समूढ्मस्यपाम्सुरे
त्रीणि त्रीणि त्रीणि पादा विचक्रमे, विष्णुर्गोपादाभ्यः
अतो धर्मानेधारयन्, विश्नोह कर्माणिपश्यतयेतो व्रतानि पस्पशे
इन्द्रस्य यज्ञः सखा, तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् तद्विप्रासो विपन्यवो जाग्रवांसह समिन्धते
विष्णोर्यत्र रामं पदं
देवश्य त्वा सवितुः प्रसवेश्विनोर्भाहुभ्यां पूष्णयो हस्ताभ्याम्
अग्नेय्स्तेजसा, सूर्यश्च अर्चसेन्द्रस्यं इन्द्रियेनाभिशिञ्चामि।

बलाय श्रियै यशसेन्नाध्याय अमृताभिषेको अस्तु ।
शान्तिः पुश्टिः तुश्टिः च अस्तु ॥

ॐ श्री रामचन्द्राय नमः । महा अभिषेक स्नानं समर्पयामि ॥

---

३० प्रतिष्ठापन

ॐ नमो रामचन्द्राय ॥ (Repeat 12 times)

ॐ तदुस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमेस्तुशस्तं ।
अशीमहि गाढमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय ॥
ॐ ग्रिहावै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा ।
शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते गृहानेवै ॥
नानाजिगमिशति ग्रिहाहि पशूनां प्रतिष्ठ प्रतिष्ठा

ॐ श्री रामचन्द्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय नमः ।
श्री रामचन्द्रं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि ॥
श्री सीता सहित श्री रामचन्द्राय नमः ॥
सुप्रतिष्ठमस्तु ॥

---

३१ वस्त्र

(offer two pieces of cloth for the Lord)

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ॥

तप्त कान्चन सम्काशं पीताम्बरं इदं हरे
सम्गृहाण जगन्नाथ रामचन्द्र नमोस्तुते

ॐ श्री रामचन्द्राय नमः ।वस्त्रयुग्मं समर्पयामि ॥

---

३३ यज्ञोपवीत

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥

श्री रामच्युत देवेश श्रीधरानन्त राघव
ब्रह्मसूत्रम्चोत्तरीयम् गृह्ण रघुनन्दन

ॐ श्री रामचन्द्राय नमः ।यज्ञोपवीतं समर्पयामि ॥

---

३४ आभरणं , हस्त भूषणं

गृहाण नानाभरणानि रामचन्द्रे निर्मितानि ।
ललाट कंठोत्तम कर्ण हस्त नितम्ब हस्तांगुलि भूषणानि ॥

ॐ श्री रामचन्द्राय नमः ।आभरणानि समर्पयामि ॥

ॐ श्री रामचन्द्राय नमः ।हस्त भूषणं समर्पयामि ॥

---

३५ गंध

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

कुम्कुमागरु कस्तूरि कर्पूरं चन्दनं तथा
तुभ्यं दास्यामि राजेन्द्र श्री राम स्वीकुरु प्रभो

ॐ श्री रामचन्द्राय नमः ।गंधं समर्पयामि ॥

---

३६ नाना परिमल द्रव्य

ॐ अहिरैव भोग्येः पर्येति बाहुं जाया हेतिं परिभादमानः ।
हस्तज्ञो विश्वावयुनानि विद्वान्पुमास्प्रमांसं परिपातु विश्वतः ॥

ॐ श्री रामचन्द्राय नमः ।नाना परिमल द्रव्यं समर्पयामि ॥

---

३७ अक्षत

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

श्वेत तुन्डल सम्युक्तान्, कुम्कुमेन विराजितान्
अक्षतान् गृह्यतां देव, नारायण नमोस्तुते

श्री रामचन्द्राय नमः ।अक्षतान् समर्पयामि ॥

---

३८ पुष्प

माल्यादीनि सुगन्धीनि, माल्यतादीनि वैप्रभो ।
मया ह्रितानि पूजार्थम्, पुष्पणि प्रतिगृह्यताम् ॥

ॐ श्री रामचन्द्राय नमः ।पुष्पाणि समर्पयामि ॥

तुलसी कुन्द मन्दार, जाजी पुन्नाग चम्पकैः ।
कदम्ब करवीरैस्च कुसुमे शतपत्रकैः ॥

जलाम्बुजैर्बिल्वपत्रैस्चमप्कै राघवं विभुं ।
पूजयिष्याम्यहं भक्त्या संगृहाण जनार्धना ॥

तुलसी कुन्द मन्दार पारिजाम्बुजैर्युताम् ।
वनमालां प्रदास्यामि गृह्ण जगदीश्वर ॥

ॐ श्री रमचन्द्राय नमः ।पत्र पुष्पाणि वनमालां च समर्पयामि ॥

---

३९ नाना अलंकार

कटि सूताङ्गुली येच कुन्डले मुकुटम् तथा ।
वनमालां कौस्तुभं च गृह्ण पुरुषोत्तम ॥

श्री रामचन्द्राय नमः ।नाना अलन्कारान् समर्पयामि ॥

---

३९ अथांगपूजाः

ॐ श्री रामचन्द्राय नमः । पादौ पूजयामि ॥
ॐ राजीवलोचनाय नमः । गुल्फौ पूजयामि ॥
ॐ रावणान्तकाय नमः । जानुनी पूजयामि ॥
ॐ वाचस्पतये नमः । जंघै पूजयामि ॥
ॐ विश्वरूपाय नमः । ऊरून् पूजयामि ॥

ॐ लक्ष्मणाग्रजाय नमः । गुह्यं पूजयामि ॥
ॐ विश्वमूर्तये नमः । जघनं पूजयामि ॥
ॐ विश्वामित्र प्रियाय नमः । कटिं पूजयामि ॥
ॐ परमात्मने नमः । उदरं पूजयामि ॥
ॐ श्रीकण्टाय नमः । हृदयं पूजयामि ॥

ॐ यज्विने नमः । पार्श्वौ पूजयामि ॥
ॐ त्रिविक्रमाय नमः । पृष्ठदेहं पूजयामि ॥
ॐ पद्मनाभाय नमः । स्कन्धौ पूजयामि ॥
ॐ सर्वास्त्रधारिणे नमः । बाहून् पूजयामि ॥
ॐ रघूद्वयाय नमः । हस्तान् पूजयामि ॥

ॐ आदि पुरुषाय नमः । कंठं पूजयामि ॥
ॐ विभीशण प्रतिष्ठात्रे नमः । वदनं पूजयामि ॥
ॐ दया सागराय नमः । नासिकां पूजयामि ॥
ॐ सेतुकृते नमः । श्रोत्रे पूजयामि ॥
ॐ महायोगिने नमः । नेत्राणि पूजयामि ॥

ॐ धनुर्धराय नमः । भ्रवौ पूजयामि ॥
ॐ जितवाराशये नमः । भ्रूमध्यं पूजयामि ॥
ॐ सीतापतये नमः । ललाटं पूजयामि ॥
ॐ ज्ञान गम्याय नमः । शिरः पूजयामि ॥

ॐ चंद्रमौलये नमः । मौलिं पूजयामि ॥

ॐ श्री रामचन्द्राय नमः सर्वाङ्गाणि पूजयामि ॥

---

४० अथ पुष्प पूजा

ॐ रामाय नमः । करवीर पुष्पं समर्पयामि ॥
ॐ रामभद्राय नमः । जाजी पुष्पं समर्पयामि ॥
ॐ शाश्वताय नमः । चम्पक पुष्पं समर्पयामि ॥
ॐ राजीवलोचनाय नमः । वकुल पुष्पं समर्पयामि ॥
ॐ श्रीमते नमः । शतपत्र पुष्पं समर्पयामि ॥

ॐ राजेन्द्राय नमः । कल्हार पुष्पं समर्पयामि ॥
ॐ रघुपुन्गवाय नमः । सेवन्तिका पुष्पं समर्पयामि ॥
ॐ जानकीवल्लभाय नमः । मल्लिका पुष्पं समर्पयामि ॥
ॐ जैत्राय नमः । इरुवंतिका पुष्पं समर्पयामि ॥
ॐ जितामित्राय नमः । गिरिकर्णिका पुष्पं समर्पयामि ॥
ॐ जनार्दनाय नमः । आथसी पुष्पं समर्पयामि ॥
ॐ विश्वामित्र प्रियायनमः । पारिजात पुष्पं समर्पयामि ॥
ॐ दन्ताय नमः । पुन्नाग पुष्पं समर्पयामि ॥
ॐ वाग्मिने नमः । कुन्द पुष्पं समर्पयामि ॥
ॐ सत्य वाचे नमः । मालति पुष्पं समर्पयामि ॥

ॐ सत्य विक्रमाय नमः । केतकी पुष्पं समर्पयामि ॥
ॐ सत्य व्रताय नमः । मन्दार पुष्पं समर्पयामि ॥
ॐ व्रतधराय नमः । पातली पुष्पं समर्पयामि ॥
ॐ कौसलेयाय नमः । अशोक पुष्पं समर्पयामि ॥
ॐ खरध्वंसिने नमः । पूग पुष्पं समर्पयामि ॥

ॐ विरादवधपन्डिताय नमः । दादिमा पुष्पं समर्पयामि ॥
ॐ सप्तताळप्रभेत्रे नमः । देव दारु पुष्पं समर्पयामि ॥
ॐ ताटकान्तकाय नमः । सुगन्ध राज पुष्पं समर्पयामि ॥
ॐ वेदान्तसाराय नमः । कमल पुष्पं समर्पयामि ॥

श्री रामचन्द्र स्वामिने नमः । पुष्पपूजां समर्पयामि ॥

---

४१ अथ पत्र पूजा

ॐ रामाय नमः । तुलसी पत्रं समर्पयामि ॥
ॐ आदिपुरुषाय नमः । जाजी पत्रं समर्पयामि ॥
ॐ धन्विने नमः । चम्पका पत्रं समर्पयामि ॥
ॐ पित्रभक्ताय नमः । बिल्व पत्रं समर्पयामि ॥
ॐ वरप्रदाय नमः । धुर्वायुग्मं समर्पयामि ॥

ॐ जितक्रोधाय नमः । सेवन्तिका पत्रं समर्पयामि ॥
ॐ जगद्गुरवे नमः । मरुग पत्रं समर्पयामि ॥
ॐ महादेवाय नमः । दवन पत्रं समर्पयामि ॥
ॐ महाभुजाय नमः । करवीर पत्रं समर्पयामि ॥
ॐ सौम्याय नमः । विष्णु क्रान्ति पत्रं समर्पयामि ॥
ॐ ब्रह्मण्याय नमः । माचि पत्रं समर्पयामि ॥
ॐ मुनिसंस्तुताय नमः । मल्लिका पत्रं समर्पयामि ॥
ॐ महायोगिने नमः । इरुवन्तिका पत्रं समर्पयामि ॥
ॐ महोदराय नमः । अपामर्ग पत्रं समर्पयामि ॥
ॐ परमपुरुषाय नमः । पारिजात पत्रं समर्पयामि ॥
ॐ पुन्योदयाय नमः । दाडिम पत्रं समर्पयामि ॥
ॐ दयासागराय नमः । बदरी पत्रं समर्पयामि ॥
ॐ स्मितवक्त्राय नमः । देवदारु पत्रं समर्पयामि ॥
ॐ मितभाषिणे नमः । मन्दार पत्रं समर्पयामि ॥
ॐ पूर्वभाषिणे नमः । आम्र पत्रं समर्पयामि ॥
ॐ राघवाय नमः । मन्दार पत्रं समर्पयामि ॥
ॐ सेतुकृते नमः । वट पत्रं समर्पयामि ॥
ॐ जितवाराशये नमः । कमल पत्रं समर्पयामि ॥

ॐ हरये नमः ।वेनु पत्रं समर्पयामि ॥

ॐ रामचन्द्र स्वामिने नमः ।पत्रपूजां समर्पयामि ॥

---

४२ अष्टोत्तरशतनाम पूजा

Chant Dhyaan Shlokas

ॐ रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीताया पतये नमः ॥

श्री रामं रघुवरं सीतापतिं सुन्दरं
काकुथ्सं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुल तिलकं रावणारिं मुरारिम् ॥

ॐ श्री रामाय नमः ।
ॐ रामभद्राय नमः ।
ॐ रामचन्द्राय नमः ।
ॐ शाश्वताय नमः ।
ॐ राजीवलोचनाय नमः ।
ॐ श्रीमते नमः ।
ॐ राजेन्द्राय नमः ।
ॐ रघुपुन्गवाय नमः ।
ॐ जानकी वल्लभाय नमः ।

ॐ जैत्राय नमः ।
ॐ जितानित्राय नमः ।
ॐ जनार्दनाय नमः ।
ॐ विश्वामित्रप्रियाय नमः ।
ॐ दान्ताय नमः ।
ॐ शरणत्राणतत्पराय नमः ।
ॐ वाली प्रमथनाय नमः ।
ॐ वाग्मिने नमः ।
ॐ सत्यवाचे नमः ।
ॐ सत्यविक्रमाय नमः ।
ॐ सत्यव्रताय नमः ।
ॐ व्रतधराय नमः ।

ॐ सदा हनुमदाश्रयाय नमः ।
ॐ कौसलेयाय नमः ।
ॐ खरध्वंसिने नमः ।
ॐ विराद वधपन्डिताय नमः ।
ॐ विभीषण परिधात्रे नमः ।
ॐ हरकोदण्ड खंडनाय नमः ।
ॐ सप्तताल प्रभेत्रे नमः ।
ॐ दशग्रीव शिरोहराय नमः ।
ॐ जामद्गन्य महादर्प नमः ।
ॐ दमनाय नमः ।
ॐ ताटकान्तकाय नमः ।
ॐ वेदान्तसाराय नमः ।

ॐ वेदात्मने नमः ।
ॐ भवरोगस्य भेशजाय नमः ।
ॐ दूषणत्रिशिरोहन्त्रे नमः ।
ॐ त्रिमूर्तये नमः ।
ॐ त्रिगुणात्मकाय नमः ।
ॐ त्रिविक्रमाय नमः ।
ॐ त्रिलोकात्मने नमः ।
ॐ पुण्याचरित्रकीर्तनाय नमः ।
ॐ त्रिलोकरक्षकाय नमः ।
ॐ धन्विने नमः ।
ॐ दन्डकारण्य पुन्यकृते नमः ।

ॐ अहल्या शापदमनाय नमः ।
ॐ पित्र भक्ताय नमः ।
ॐ वरप्रदाय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ जितक्रोधाय नमः ।
ॐ जितमित्राय नमः ।
ॐ जगद्गुरवे नमः ।
ॐ ऋक्ष वानर सन्घातिने नमः ।
ॐ चित्रकूटसमाश्रयाय नमः ।
ॐ जयन्तत्राण वरदाय नमः ।
ॐ सुमित्रापुत्रसेविताय नमः ।
ॐ सर्वदेवादिदेवाय नमः ।

ॐ मृतवानर् जीवनाय नमः ।
ॐ मायामारीचहन्त्रे नमः ।
ॐ महादेवाय नमः ।
ॐ महा भुजाय नमः ।
ॐ सर्वदेवस्तुताय नमः ।
ॐ सौम्याय नमः ।
ॐ ब्रह्मण्याय नमः ।
ॐ मुनि सम्स्तुताय नमः ।
ॐ महा योगिने नमः ।
ॐ महोदराय नमः ।
ॐ सुग्रीवेप्सित राज्यदाय नमः ।
ॐ सर्वपुण्याधिक फलाय नमः ।

ॐ स्म्रित सर्वाघ नाशनाय नमः ।
ॐ आदिपुरुषाय नमः ।

ॐ परमपुरुषाय नमः ।
ॐ पुण्योदयाय नमः ।
ॐ दयासागराय नमः ।
ॐ पुराणपुरुषोत्तमाय नमः ।
ॐ स्मित वक्त्राय नमः ।
ॐ मित भाषिणे नमः ।
ॐ पूर्व भाषिणे नमः ।
ॐ राघवाय नमः ।
ॐ अनन्तगुणगम्भीराय नमः ।
ॐ धीरोद्दत्त गुणोत्तमाय नमः ।

ॐ मायामानुशचारित्राया नमः ।
ॐ महादेवादिपूजिताय नमः ।
ॐ सेतुकृते नमः ।
ॐ जितवाराशये नमः ।
ॐ सर्व तीर्थमयाय नमः ।
ॐ हरये नमः ।
ॐ श्यामांगाय नमः ।
ॐ सुन्दराय नमः ।
ॐ शूराय नमः ।

ॐ पीत वाससे नमः ।
ॐ धनुर्धराय नमः ।
ॐ सर्व यज्ञाधिपाय नमः ।
ॐ यग्निने नमः ।
ॐ जरामरण वर्जिताय नमः ।
ॐ विभीषण प्रतिष्ठात्रे नमः ।
ॐ सर्वावगुणवर्जिताय नमः ।
ॐ परमात्मने नमः ।
ॐ परब्रह्मणे नमः ।

ॐ सच्चिदानन्द विग्रिहाय नमः ।
ॐ परमज्योतिषे नमः ।
ॐ परमधाम्ने नमः ।
ॐ पराकाशाय नमः ।
ॐ परात्पराय नमः ।
ॐ पतिपारगाय नमः ।
ॐ पाराय नमः ।
ॐ सर्व देवात्मकाय नमः ।
ॐ परस्मते नमः ।

श्री रामाय नमः ॥

इति अष्टोत्तर पूजां समर्पयामि ॥

---

४३ धूपं

वनस्पत्युद्भवो दिव्यो गधाढ्यो गन्धवुत्तमः ।
रामचन्द्र महिपालो धूपोयं प्रतिगृह्यतां ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

ॐ श्री रामचन्द्र स्वामिने नमः । धूपं आघ्रापयामि ॥

---

४४ दीपं

साज्यं त्रिवर्ति सम्युक्तं वह्निना योजितुं मया ।
गृहाण मन्गलं दीपम्, त्रैलोक्य तिमिरापहम् ॥

ज्योतिशां पतये तुभ्यम्, नमो रामाय वेधसे ।
गृहाण दीपकं चैव, त्रैलोक्य तिमिरापह ॥

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

ॐ श्री रामचन्द्राय नमः । दीपं दर्शयामि ॥

---

४५ नैवेद्यं

(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. ; remove lid and sprinkle water around the vessel; place in each food item one washed leaf/flower/axatha)

ॐ रामचन्द्राय विद्महे रामभद्राय धीमहि ।
तन्नो राम प्रचोदयात् ॥

ॐ नमः रामचन्द्राय ॥
(show mudras)

निर्वीशिकरणार्थे तार्क्ष मुद्रा ।
आम्रति करणार्थे धेनु मुद्रा ।
पवित्रकरणार्थे शंख मुद्रा ।
संरक्षणार्थं चक्र मुद्रा ।
विपुलमाय करणार्थे मेरु मुद्रा ।

Touch naivedya and chant 9 times 'आऊं'

ॐ सत्यंतवर्तेन परिसिंचामि
(sprinkle water around the naivedya)

भोः! स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य
(request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणकचिते गोघृतां
सुपक्वां भक्ष्यां भोज्यां च लेह्यानपि
सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं
समधु दधि घृतं क्षीर पानिय युक्तं
तांबूलं चापि श्री रामं प्रतिदिवसमहं मनसे चिंतयामि

अद्य तिष्ठति यत्किञ्चित् कल्पितश्चापरंग्रिहे
पक्वन्नं च पानीयं यथोपस्कर संयुतं
यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः
तत्सर्वं शिवपूजास्तु प्रयतां मे जनार्दन
सुधारसम् सुविफुलम् आपोषणमिदं
तव गृह्ण कलशानीतं यथेष्टमुप भुज्ज्यतां ॥

ॐ नमो रामचन्द्राय, श्री रामचन्द्राय नमः ।
अमृतोपस्तरणमसि स्वाहा ॥
(drop water from sha.nkha)

ॐ प्राणात्मने रामाय स्वाहा ।
ॐ अपानात्मने लक्षमनाय स्वाहा ।
ॐ व्यानात्मने भरताय स्वाहा ।
ॐ उदानात्मने शत्रुघ्नाय स्वाहा ।
ॐ समानात्मने आंजनेयाय स्वाहा ।

ॐ नमः रामचन्द्राय ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ॥

श्री सदाशिवाय नमस्तुभ्यं महा नैवेद्यं उत्तमम् ।
संगृहान सुरश्रेष्ठ भक्ति मुक्ति प्रदायकम् ॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

ॐ नमो रामचन्द्राय;
जानकी सहित रामचन्द्राय नमः ।

नैवेद्यं समर्पयामि ॥

(cover face with cloth and chant गायत्रि मंत्र
five times or repeat 12 times ॐ नमः रामचन्द्राय )

सर्वत्र अमृतोपिधान्यमसि स्वाहा ।

ॐ जानकी सहित रामचन्द्राय नमः । उत्तरापोषणं समर्पयामि ॥

(Let flow water from sha.nkha)

---

४६ महा फलं

(put tulsi / axathaa on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्थव ।
तेन मय् सफलावाप्तिर्भवेत् जन्मनिजन्मनि ॥

ॐ श्री रामचन्द्राय नमः । महाफलं समर्पयामि ।

---

४७ फलाष्टक
(put tulsi/axathaa on fruits)

कूश्मान्द मातुलिन्गं च कर्कठी दादिमी फलम् ।
रम्भा फलं जम्बीरं बदरं तथा ॥

ॐ श्री रामचन्द्राय नमः । फलाष्टकं समर्पयामि ॥

---

४८ करोद्वर्तन

करोद्वर्तन्कं देवमया दत्तं हि भक्तिथः ।
चारु चंद्र प्रभां दिव्यं गृह्ण जगदीश्वर ॥

ॐ श्री रामचन्द्राय नमः ।
करोद्वर्थनार्थे चंदनं समर्पयामि ॥

---

४९ तांबूलं

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम् ।
ताम्बूलं गृह्यतां राम येल लवंग सम्युक्तम् ॥

ॐ श्री रामचन्द्राय नमः । पूगिफल ताम्बूलं समर्पयामि ॥

---

५० दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः ।

अनंत पुण्य फलदा अथः शांतिं प्रयश्चमे ॥

ॐ श्री रामचन्द्राय नमः ।सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

---

५१ महा नीराजन

श्रीयै जातः श्रिय अनिरियाय श्रियं वयो जरित्रभ्यो ददाति
श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा मितद्रौ
श्रिय येवैनं तत् श्रिया मादधाति संतत मृचा वषट्कृत्यं
संततमै संधीयते प्रजया पशुभिर्य येवं वेद ॥

ॐ श्री रामचन्द्राय नमः ।महानीराजनं दीपं समर्पयामि ॥

---

५२ कर्पूर दीप

अर्चत प्ररिचत प्रियमे दासो अर्चत ।
अर्चन्तु पुत्रका वता पुराण दृष्णवर्चत ॥

कर्पूरकं महाराज रंभोद्भूतं च दीपकं ।
मंगलार्थं महीपाल संगृहान जगत्पते ॥

ॐ श्री रामचन्द्राय नमः । कर्पूर दीपं समर्पयामि ॥

---

५३ प्रदक्षिणा

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

अन्यथा शरणं नास्ति, त्वमेव् शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष रमापते ॥

श्री रामचन्द्राय नमः । प्रदक्षिणान् समर्पयामि ॥

---

५४ नमस्कार

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥

नमः सर्व हितार्थाय जगदार हेतवे
श्राश्तान्गोयं प्रणामस्ते प्रयत्नेन मया कृतः ।
उरुसा शिरसा दृष्ट्वा, मनसा वचसा तथा
पद्भ्यां कराभ्यां जानुभ्याम्, प्रणामोष्टान्गं उच्यते ॥

शात्येनापि नमस्कारान् कुर्वतः शार्न्ग पाणये ।
शत जन्मार्चितं पापं तत्क्षण देव नश्यति ॥

श्री रामचन्द्राय नमः ।नमस्कारान् समर्पयामि ॥

---

५५ राजोपचार

गृहाण परमेशान सरत्ने छत्र चामरे ।
दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः ॥

श्री रामचन्द्राय नमः ।छत्रं समर्पयामि ॥
श्री रामचन्द्राय नमः ।चामरं समर्पयामि ॥
श्री रामचन्द्राय नमः ।गीतं समर्पयामि ॥
श्री रामचन्द्राय नमः ।नृत्यं समर्पयामि ॥
श्री रामचन्द्राय नमः ।वाद्यं समर्पयामि ॥
श्री रामचन्द्राय नमः ।दर्पणं समर्पयामि ॥
श्री रामचन्द्राय नमः ।व्यञ्जनं समर्पयामि ॥
श्री रामचन्द्राय नमः ।आन्दोलणं समर्पयामि ॥
श्री रामचन्द्राय नमः ।राजोपचारान् समर्पयामि ॥
श्री रामचन्द्राय नमः ।सर्वोपचारान् समर्पयामि ॥
श्री रामचन्द्राय नमः ।समस्त रजोपचारर्थे अक्षतान् समर्पयामि ॥

---

५६ मंत्र पुष्प

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

विद्या बुद्धि धनेश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

नमस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्र नाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नाम्नो युवभ्यो नम आशिनेभ्यः ।
यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव ॥
ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां वृषन्वान् ।
शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः ॥

ॐ कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः ।
उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः ॥

ॐ राजाधि राजाय , प्रसह्य साहिने , नमो वयं वैश्रवणाय
कूर्महे समे कामान् , काम कामाय मह्यं , कामेश्वरो
वैश्रवणो दधातु , कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति , साम्राज्यं , भोज्यं , स्वाराज्यं , वैराज्यं ,
पारमेष्ठं राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायिस्यात् सार्व भौमः सार्वायुशः, अंताद ,
परर्धत् , पृथिव्यै समुद्र पर्यंतय एकरालिति तदप्येश
श्लोकोभिगीतो मरूतः , परिवेष्टारो मरुत्तस्या वसन् ग्रिहे
आविक्षितास्य कामप्रेर्विश्वेदेवा सभासद इति ॥

श्री रामचन्द्राय नमः । मंत्रपुष्पं समर्पयामि ॥

---

५७ शंख ब्रमण

(make three rounds of sha.nkha with water like aarati and pour down;
chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे ।
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

---

५८ तीर्थ प्राशन

ॐ श्रियः कान्ताय कल्याण निधये निधयेर्तिनाम् ।
श्री वेन्कट निवासाय, श्रीनिवासाय मंगलम् ॥

सर्वदा सर्व कार्येषु, नास्ति तेषां अमंगलम् ।
येषां हृदयिस्थो भगवान्, मन्गालायतनो हरिः ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्तो जनार्दनः ॥

अकाल मृत्यु हरणं सर्व व्याधि निवारणं । सर्व पाप उपशमनं
श्री राम पादोदकं शुभम् ॥

---

५९ उपयन दानं

ब्राह्मण सुहासिनि पूजा
(wash feet, wipe, offer gandha, kumkum, flowers,
sapaad, ruits and gitfs and make obeisances)

इष्ट काम्यार्थ प्रयुक्त, सम्यग् आचरित,

श्री राम नवमी पूजा साम्पूर्न फल वाप्यर्थिं,
श्री रामचन्द्र स्वरूपाय ब्राह्मणाये वायन दानं करिष्ये ॥

श्री रामचन्द्र स्वरूपाय ब्रह्मनाय आवाहन पूर्वक
आसन गन्ध अक्षत धूप् दीपादि सकलाराधनै स्वर्चितम् ।
नारायण प्रतिगृह्णात्, नारायणो वै ददाति च
नारायणो तारकोभ्यां, नारायणाय नमो नमः ।

देवश्य त्वा सवितुह् प्रसवेश्विनोर् भाहुभ्यां पूष्णयो हस्ताभ्यां
अग्नेय् तेजसा, सूर्यश्च वर्च सेन्द्रियेना भिसिन्चामि।

बलाय श्रियेय् यश सेन्न द्याय, श्री रामचन्द्रस्वामिने नमः ।,
वायनदानं प्रतिगृह्णातु (प्रतिगृहन्ना विलाति प्रतिवचनम्)

---

६० विसर्जन पूजा

आराधितानां देवतानां पुनः पूजस्म करिष्ये ॥
श्री रामचन्द्र स्वामि देवताभ्यो नमः ॥

पूजांते छत्रं समर्पयामि । चामरं समर्पयामि ।
नृत्यं समर्पयामि । गीतं समर्पयामि ।
वाद्यं समर्पयामि । आंदोलिक् आरोहणं समर्पयामि ।
अश्वारोहणम् समर्पयामि । गजारोहणं समर्पयामि ।

श्री रामचन्द्र स्वामि देवताभ्यो नमः ।

समस्त राजोपचार , देवोपचार , शक्त्युपचार , भक्त्युपचार
पूजां समर्पयामि ॥

---

६१ आत्म समर्पण

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिशु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्देय् तम् अच्युतम् ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मयादेव परिपूर्णं तथास्तु मे ॥

अनेन मया क्रतेन श्रीरामचन्द्र देवता सुप्रीत सुप्रसन्न वरदा भवतु ।

मध्ये मन्त्र, तन्त्र स्वर, वर्ण न्यूनातिरिक्त, लोप, दोष,
प्रायश्चित्तार्थं राम नाम महा मन्त्र जपं करिष्ये ॥

ॐ रामाय नमः । रामभद्राय नमः । रामचन्द्राय नमः ।
ॐ रामाय नमः । रामभद्राय नमः । रामचन्द्राय नमः ।
ॐ रामाय नमः । रामभद्राय नमः । रामचन्द्राय नमः ।
ॐ राम रामभद्र रामचन्द्रेभ्यो नमः ।

कायेन वाचा मनसेन्द्रियेर्वा, बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै रामचंद्रेति समर्पयामि ॥

नमस्स्मरोमि ।
श्री रामचन्द्र स्वामी देवता प्रसादं शिरसा गृह्णामि ॥

---

६२ क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

यान्तु देव गण सर्वे पूजां आदाय पर्तिवीम्
इष्ट काम्यर्थ सिद्यर्थं पुनरागमनाय च ॥

(Shake the kalasha)

॥ श्री रामचंद्रार्पणमस्तु ॥

---

Transliterated by S. aa. Bhandarkar Proof Read by Sowmya Ramkumar Last updated on May 17, 1997 Please send corrections to shree@usa.net